वत्सोहमद्य गंतुं प्रवृत्तोस्मि सतेपकाष्टः २३ इत्थमेव सदा कार्यं गुरुभिस्त्वत्समै
र्भिः प्रमादाद्रक्षतः पुंसः स्वपदाद्भ्रंशनं द्विज २४ अनुगृह्णीष्व मां विप्र गच्छामो
द्य त्वया सह अयोध्यां मां निवेश्याद्य पुनरायातुमर्हसि २५ इत्युक्तो रघुपतिनाद्य
टोद्भवोसौ नो वाच्यं भवति तदेति संप्रभाष्य आरुह्यांबरगमनं सरामसेष सुग्रीवा
दिकसहितः पुरं गतस्ते २६ नंदिग्रामे तपस्यंतं भरतं संप्रगृह्य सः चित्रध्वजपता
काढ्यां प्राविशद्राघवः पुरीं २७ तत्राभिषिच्य रघुपुंगवमप्रमेयं सीतापतिं सक
ललोकमनोभिरामं सर्वाः प्रजाः समगमन् कृतकृत्यभावं मानोन्मुखो वदन्मुनिप्रण
मन् मगस्त्यः २८ पट्टाभिषिक्तरामस्य सीतायाः लक्ष्मणस्य च देहि मूर्तित्रयं यस्य
पूजातो मोक्षमाप्नुयां २९ तथेति मूर्तित्रितयं प्रदत्तं रामेण संगृह्य पदे प्रणम्य